॥श्रीः ॥

# शाक्त उपनिषत्

Prepared & Edited by:

BHASKARA PRAKASHA ASHRAM

# Table of Contents

॥ गणपत्यथर्वशीर्षोपनिषत् ॥..........................................4

॥ देव्यथर्वशीर्षोपनिषत् ॥................................................9

॥ भावनोपनिषत् ॥........................................................15

॥ त्रिपुरोपनिषत् ॥........................................................19

॥ कौलोपनिषत् ॥..........................................................22

# ॥ गणपत्यथर्वशीर्षोपनिषत् ॥

ॐ भद्रं कर्णेभिः शृणुयाम देवाः । भद्रं पश्येमाक्षभिर्यजत्राः ।
स्थिरैरङ्गैस्तुष्टुवागं सस्तनूभिः । व्यशेम देवहितं यदायुः ।
स्वस्ति न इन्द्रो वृद्धश्रवाः । स्वस्ति नः पूषा विश्ववेदाः ।
स्वस्ति नस्ताक्ष्र्यो अरिष्टनेमिः । स्वस्ति नो बृहस्पतिर्दधातु ॥
ॐ शान्तिः शान्तिः शान्तिः ॥

ॐ नमस्ते गणपतये । त्वमेव प्रत्यक्षं तत्त्वमसि ।
त्वमेव केवलं कर्ताऽसि । त्वमेव केवलं धर्ताऽसि ।
त्वमेव केवलं हर्ताऽसि । त्वमेव सर्वं खल्विदं ब्रह्मासि ।
त्वं साक्षादात्माऽसि नित्यम् ॥ १ ॥
ऋतं वच्मि । सत्यं वच्मि ॥ २ ॥
अव त्वं माम् । अव वक्तारम् । अव श्रोतारम् । अव दातारम् ।
अव धातारम् । अवानूचानमव शिष्यम् । अव पश्चात्तात्।
अव पुरस्तात् । अवोत्तरात्तात्। अव दक्षिणात्तात्। अव चोर्ध्वात्तात् ।
अवाधरात्तात् । सर्वतो मां पाहि पाहि समन्तात् ॥ ३ ॥

त्वं वाङ्मयस्त्वं चिन्मयः । त्वमानन्दमयस्त्वं ब्रह्ममयः ।
त्वं सच्चिदानन्दाऽद्वितीयोऽसि । त्वं प्रत्यक्षं ब्रह्मासि ।
त्वं ज्ञानमयो विज्ञानमयोऽसि ॥४॥
सर्वं जगदिदं त्वत्तो जायते । सर्वं जगदिदं त्वत्तस्तिष्ठति ।
सर्वं जगदिदं त्वयि लयमेष्यति । सर्वं जगदिदं त्वयि प्रत्येति ।
त्वं भूमिरापोऽनलोऽनिलो नभः । त्वं चत्वारि वाक्पदानि ॥ ५ ॥
त्वं गुणत्रयातीतः । त्वं देहत्रयातीतः ।
त्वं कालत्रयातीतः । त्वं मूलाधारस्थितोऽसि नित्यम् ।
त्वं शक्तित्रयात्मकः । त्वां योगिनो ध्यायन्ति नित्यम् ।
त्वं ब्रह्मा त्वं विष्णुस्त्वं रुद्रस्त्वमिन्द्रस्त्वमग्निस्त्वं
वायुस्त्वं सूर्यस्त्वं चन्द्रमास्त्वं ब्रह्म भूर्भुवः सुवरोम् ॥ ६ ॥
गणादिं पूर्वमुच्चार्य वर्णादीं स्तदनन्तरम् । अनुस्वारः परतरः ।
अर्धेन्दुलसितम् । तारेण ऋद्धम् । एतत्तव मनुस्वरूपम् ।
गकारः पूर्वरूपम् । अकारो मध्यमरूपम् । अनुस्वारश्चान्त्यरूपम् ।
बिन्दुरुत्तररूपम् । नादः सन्धानम् । सग्ंहिता सन्धिः ।

सैषा गणेशविद्या । गणक ऋषिः । निचृद्गायत्रीच्छन्दः ।
श्री महागणपतिर्देवता । ॐ गं गणपतये नमः ॥ ७ ॥
एकदन्ताय विद्महे वक्रतुण्डाय धीमहि । तन्नो दन्तिः प्रचोदयात् ॥ ८ ॥
एकदन्तं चतुर्हस्तं पाशमङ्कुशधारिणम् ।
रदं च वरदं हस्तैर्बिभ्राणं मूषकध्वजम् ।
रक्तं लम्बोदरं शूर्पकर्णकं रक्तवाससम् ।
रक्तगन्धानुलिप्ताङ्गं रक्तपुष्पैः सुपूजितम् ।
भक्तानुकम्पिनं देवं जगत्कारणमच्युतम् ।
आविर्भूतं च सृष्ट्यादौ प्रकृतेः पुरुषात्परम् ।
एवं ध्यायति यो नित्यं स योगी योगिनां वरः ॥ ९ ॥
नमो व्रातपतये नमो गणपतये नमः प्रमथपतये नमस्तेऽस्तु लम्बोदराय
एकदन्ताय विघ्नविनाशिने शिवसुताय श्रीवरदमूर्तये नमो नमः ॥ १० ॥
एतदथर्वशीर्षं योऽधीते । स ब्रह्मभूयाय कल्पते ।
स सर्वतः सुखमेधते । स सर्वविघ्नैर्न बाध्यते ।
स पञ्चमहापापात् प्रमुच्यते । सायमधीयानो दिवसकृतं पापं नाशयति ।

प्रातरधीयानो रात्रिकृतं पापं नाशयति । सायं प्रातः प्रयुञ्जानो अपापो भवति । सर्वत्राधीयानोऽपविघ्नो भवति । धर्मार्थकाममोक्षं च विन्दति । इदमथर्वशीर्षमशिष्याय न देयम् । यो यदि मोहाद् दास्यति । स पापीयान् भवति । सहस्रावर्तनाद् यं यं काममधीते । तं तं अनेन साधयेत् ॥ ११ ॥

अनेन गणपतिमभिषिञ्चति । स वाग्मी भवति । चतुर्थ्यामनश्नन् जपति । स विद्यावान् भवति । इत्यथर्वणवाक्यम् । ब्रह्माद्याचरणं विद्यात् न बिभेति कदाचनेति॥ १२॥

यो दूर्वाङ्कुरैर्यजति स वैश्रवणोपमो भवति । यो लाजैर्यजति स यशोवान् भवति । स मेधावान् भवति । यो मोदकसहस्रेण यजति स वाञ्छितफलमवाप्नोति । यः साज्य समिद्भिर्यजति स सर्वं लभते स सर्वं लभते ॥ १३ ॥

अष्टौ ब्राह्मणान् सम्यग् ग्राहयित्वा सूर्यवर्चस्वी भवति । सूर्यग्रहे महानद्यां प्रतिमासन्निधौ वा जप्त्वा सिद्धमन्त्रो भवति । महाविघ्नात् प्रमुच्यते । महादोषात् प्रमुच्यते ।

महापापात् प्रमुच्यते । स सर्वविद्भवति स सर्वविद्भवति ।
य एवं वेद । इत्युपनिषत् ॥ १४ ॥

भद्रं कर्णेभिः शृणुयाम देवाः । भद्रं पश्येमाक्षभिर्यजत्राः ।
स्थिरैरङ्गैस्तुष्टुवाग्ं सस्तनूभिः । व्यशेम देवहितं यदायुः ।
स्वस्ति न इन्द्रो वृद्धश्रवाः । स्वस्ति नः पूषा विश्ववेदाः ।
स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः । स्वस्ति नो बृहस्पतिर्दधातु ॥
ॐ शान्तिः शान्तिः शान्तिः ॥

## ॥ देव्यथर्वशीर्षोपनिषत् ॥

ॐ भद्रं कर्णेभिः शृणुयाम देवाः । भद्रं पश्येमाक्षभिर्यजत्राः ।
स्थिरैरङ्गैस्तुष्टुवाग्ं सस्तनूभिः । व्यशेम देवहितं यदायुः ।
स्वस्ति न इन्द्रो वृद्धश्रवाः । स्वस्ति नः पूषा विश्ववेदाः ।
स्वस्ति नस्ताक्ष्र्यो अरिष्टनेमिः । स्वस्ति नो बृहस्पतिर्दधातु ॥
ॐ शान्तिः शान्तिः शान्तिः ॥

ॐ सर्वे वै देवा देवीमुपतस्थुः । कासि त्वं महादेवीति ॥ १ ॥
साब्रवीद् अहं ब्रह्मस्वरूपिणी । मत्तः प्रकृति पुरुषात्मकं जगत् ।
शून्यं च शून्यं च ॥ २ ॥
अहमानंदा ना नन्दौ । अहं विज्ञाना विज्ञाने ।
अहं ब्रह्मा ब्रह्मणि वेदितव्ये ।
अहं पञ्च भूतान्य पञ्चभूतानी । अहं अखिलं जगत् ॥ ३ ॥
वेदोऽहम वेदोऽहम् । विद्याहम विद्याहम् । अजाह–मनजाहम् ।
अधश् चोर्ध्वं च तिर्यक् चाहम् ॥ ४ ॥
अहं रुद्रेभिर् वसुभिश् चरामि । अहमादित्यैरुत विश्वदेवैः।

अहं मित्रा वरुणा वुभौ बिभर्मि । अहमिन्द्राग्नी अहमश्विना वुभौ ॥ ५ ॥

अहं सोमं त्वष्टारं पूषणं भगं दधामि ।

अहं विष्णुमुरुक्रमं ब्रह्माणामुत प्रजापतिं दधामि ॥ ६ ॥

अहं दधामि द्रविणं हविष्मते सुप्राव्ये(३) यजमानाय सुन्वते ।

अहं राष्ट्री सङ्गमनी वसूनां चिकितुषी प्रथमा यज्ञियानां ।

अहं सुवे पितरमस्य मूर्धन्मम योनिरप्स्व अन्तः समुद्रे ।

य एवं वेद । स दैवीं संपदमाप्नोति ॥ ७ ॥

ते देवा अब्रुवन् । नमो देव्यै महादेव्यै शिवायै सततं नमः ।

नमः प्रकृत्यै भद्रायै नियताः प्रणता स्म ताम् ॥८ ॥

तामग्निवर्णां तपसा ज्वलन्तीं वैरोचनीं कर्मफलेषु जुष्टाम् ।

दुर्गां देवीगं शरणमहं प्रपद्यामहे असुरान्नाशयित्र्यै ते नमः ॥ ९ ॥

देवीं वाचमजनयन्त देवास्तां विश्वरूपाः पशवो वदन्ति ।

सा नो मन्द्रेषमूर्जं दुहाना धेनुर्वागस्मानुप सुष्टुतैतु ॥ १० ॥

कालरात्रीं ब्रह्मस्तुतां वैष्णवीं स्कन्दमातरम् ।

सरस्वतीमदितिं दक्षदुहितरं नमामः पावनां शिवाम् ॥ ११ ॥

महालक्ष्म्यै च विध्महे सर्व शक्त्यै च धीमहि ।

तन्नो देवी प्रचोदयात् ॥ १२ ॥

अदितिर्ह्यजनिष्ट दक्ष या दुहिता तव ।

तां देवा अन्व जायन्त भद्रा अमृतबन्धवः ॥ १३॥

कामो योनिः कमला वज्रपाणिर्गुहा हसामातरिश्वाभ्रमिन्द्रः ।

पनर्गुहा सकला मायया च पुरूच्यैषा विश्वमातादिविद्योम् ॥ १४ ॥

एषात्मशक्तिः । एषा विश्वमोहिनी । पाशाङ्कुश धनुर्बाण धरा ।

एषा श्रीमहाविद्या । य एवं वेदा । स शोकं तरति ॥ १५ ॥

नमस्ते अस्तु भगवति मातरस्मान्पाहि सर्वतः ॥१६ ॥

सैषाष्टौ वसवः । सैषैका दश रुद्राः । सैषा द्वादशादित्याः ।

सैषा विश्वेदेवाः सोमपा असोमपाश्च ॥

सैषा यातुधाना असुरा रक्षांसि पिशाचा यक्षाः सिद्धाः ।

सैषा सत्वरजस्तमांसि । सैषा ब्रह्मविष्णुरुद्ररूपिणी ।

सैषा प्रजापतीन्द्र मनवः । सैषा ग्रहनक्षत्रज्योतींषि ।

कलाकाष्ठादिकालरूपिणी । तामहं प्रणौमि नित्यम् ।

पापापहारिणीं देवीं भुक्तिमुक्तिप्रदायिनीम् ।
अनन्तां विजयां शुद्धां शरण्यां शिवदां शिवाम् ॥ १७॥
वियदीकारसंयुक्तं वीतिहोत्रसमन्वितम् ।
अर्धेन्दुलसितं देव्या बीजं सर्वार्थसाधकम् ॥१८ ॥
एवमेकाक्षरं ब्रह्म यतयः शुद्धचेतसः ।
ध्यायन्ति परमानन्दमया ज्ञानांबुराशयः ॥ १९ ॥
वाङ्मया ब्रह्मसूस्तस्मात् षष्ठं  वक्त्रसमन्वितम् ।
सूर्योऽवामश्रोत्र बिन्दुः संयक्तष्टाकत्तृतीयकः ।
नारायणेन सम्मिश्रो वायुश्चाधरयुक् ततः ।
विच्चे नवार्णकोऽर्णः स्यान् महदानन्ददायकः ॥ २० ॥
हृत्पुण्डरीकमध्यस्थां प्रातःसूर्यसमप्रभाम् ।
पाशाङ्कुशधरा  सौम्यां वरदाभयहस्तकाम् ।
त्रिनेत्रां रक्तवसनां भक्तकामदुघां भजे ॥ २१ ॥
नमामि त्वां महादेवीं महाभयविनाशिनीम् ।
महादुर्गप्रशमनीं महाकारुण्यरूपिणीम् ॥ २२ ॥

यस्याः स्वरूपं ब्रह्मादयो न जानन्ति तस्मादुच्यते अज्ञेया ।

यस्या अन्तो न लभ्यते तस्मादुच्यते अनन्ता ॥

यस्या लक्ष्यं नोप लभ्यते तस्मादुच्यते अलक्ष्या ।

यस्या जननं नोपलभ्यते तस्मादुच्यते अजा ।

एकैव सर्वत्र वर्तते तस्मादुच्यते एका ।

एकैव विश्वरूपिणी तस्मादुच्यते नैका ।

अत एवोच्यते अज्ञेयानंतालक्ष्याजैकानैकेति ॥ २३ ॥

मन्त्राणां मातृकादेवी शब्दानांज्ञानरूपिणी ।

ज्ञानानां चिन्मयातीता शून्यानां शून्यसाक्षिणी ।

यस्याः परतरं नास्ति सैषा दुर्गा प्रकीर्तिता ॥ २४ ॥

तां दुर्गां दुर्गमां देवीं दुराचारविघातिनीम् ।

नमामि भवभीतोऽहं संसारार्णवतारिणीम् ॥ २५ ॥

इदमथर्वशीर्षं योऽधीते । स पञ्चथर्वशीर्षजपफलमवाप्नोति ।

इदमथर्वशीर्षमज्ञात्वा योऽर्चां स्थापयति । शतलक्षं प्रजप्त्वापि

सोऽर्चासिद्धिं च विन्दति । शतमष्टोत्तरं चास्य पुरश्चर्याविधिः स्मृतः ।

दशवारं पठेद्यस्तु सद्यः पापैः प्रमुच्यते ।
महादुर्गाणि तरति महदेव्याः प्रसादतः ॥ २६ ॥
सायमधीयानो दिवसकृतं पापं नाशयति ।
प्रातरधीयानो रात्रिकृतं पापं नाशयति ।
सायं प्रातः प्रयुञ्जानो अपापो भवति ।
निशीथे तुरीयसंध्यायां जप्त्वा वाक्सिद्धिर् भवति ।
नूतनायां प्रतिमायां जप्त्वा देवतासान्निध्यं भवति ।
प्राणप्रतिष्ठायां जप्त्वा प्राणानां प्रतिष्ठा भवति ।
भौमाश्विन्यां  महादेवी सन्निधौ जप्त्वा महामृत्युं तरति ।
स महामृत्युं तरति । य एवं वेद इत्युपनिषत् ॥ २७ ॥
ॐ भद्रं कर्णेभिः शृणुयाम देवाः । भद्रं पश्येमाक्षभिर्यजत्राः ।
स्थिरैरङ्गैस्तुष्टुवाग्ं सस्तनूभिः । व्यशेम देवहितं यदायुः ।
स्वस्ति न इन्द्रो वृद्धश्रवाः । स्वस्ति नः पूषा विश्ववेदाः ।
स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः । स्वस्ति नो बृहस्पतिर्दधातु ॥
ॐ शान्तिः शान्तिः शान्तिः ॥

## ॥ भावनोपनिषत् ॥

ॐ भद्रं कर्णेभिः श्रृणुयाम देवाः । भद्रं पश्येमाक्षभिर्यजत्राः ।

स्थिरैरङ्गैस्तुष्टुवागं संस्तनूभिः । व्यशेम देवहितं यदायुः ।

स्वस्ति न इन्द्रो वृद्धश्रवाः । स्वस्ति नः पूषा विश्ववेदाः ।

स्वस्ति नस्ताक्ष्र्यो अरिष्टनेमिः । स्वस्ति नो बृहस्पतिर्दधातु ॥

ओं शान्तिः शान्तिः शान्तिः ॥

श्री गुरुः सर्वकारणभूता शक्तिः ॥१ ॥

तेन नवरन्ध्ररूपो देहः ॥२॥ नवचक्ररूपं श्रीचक्रं ॥३॥

वाराही पितृरूपा कुरुकुल्ला बलिदेवता माता ॥४ ॥

पुरुषार्थाः सागराः ॥५॥ देहो नवरत्नद्वीपः ॥६॥

त्वगादि सप्तधातुरोमसंयुक्तः ॥७॥

सङ्कल्पाः कल्पतरवः तेजः कल्पकोद्यानम् ॥८॥

रसनया भाव्यमानाः मधुराम्लतिक्त-कटु-कषाय-लवण रसाः षड्तवः ॥९॥

ज्ञानमर्घ्यं, ज्ञेयं हविः, ज्ञाता होता ज्ञातृ-ज्ञान-ज्ञेयानाम् अभेदभावनं

श्रीचक्रपूजनम् ॥१०॥

नियतिः शृङ्गारादयो रसाः अणिमादिसिद्धयः ॥ ११ ॥

काम-क्रोध-लोभ-मोह-मद-मात्सर्य-पुण्य-पापमयाः ब्राह्मयाद्यष्टशक्तयः ॥ १२ ॥

आधारनवकं मुद्राशक्तयः ॥ १३ ॥

पृथिव्यप्तेजोवाय्वाकाश श्रोत्रत्वक्-चक्षुर्जिह्वाघ्राण वाक्-पाणिपादपायूपस्थानि

मनोविकारः कामाकर्षिण्यादि षोडश शक्तयः ॥ १४ ॥

वचनादान-गमन-विसर्गानन्द हानोपादानोपेक्षाख्यबुद्धयः

अनङ्गकुसुमाद्यष्टौ ॥ १५ ॥

अलम्बुसा कुहुर्विश्वोदरा वारुणी हस्तिजिह्वा यशोवती पयस्विनी गान्धारी

पूषा शङ्खिनी सरस्वती इडा पिङ्गला सुषुम्ना चेति, चतुर्दश नाड्यः

सर्वसंक्षोभिण्यादि चतुर्दशशक्तयः ॥ १६ ॥

प्राणापान-व्यानोदान-समान, नाग-कूर्म-कृकर-देवदत्त-धनञ्जय दश वायवः,

सर्वसिद्धिप्रदादि बहिर्दशारदेवताः ॥ १७ ॥

एतद्वायुसंसर्गकोपाधिभेदेन रेचकः पाचकश्शोषको दाहकः प्लावक इति

प्राण मुख्यत्वेन पञ्चधा जठराग्निर्भवति ॥ १८ ॥

क्षारक उद्गारकः, क्षोभको जृम्भको मोहक इति, नाग प्राधान्येन पञ्चविधाः,

ते मनुष्याणां देहगाः, भक्ष्य-भोज्य-चोष्य-लेह्य-पेयात्मक

पञ्चविधमन्नं पाचयन्ति ॥ १९ ॥

एता दश वह्निकळाः सर्वज्ञाद्या अन्तर्दशारगा देवताः ॥ २० ॥

शीतोष्णसुखदुःखेच्छाः, सत्वंरजस्तमोगुणाः, वशिन्यादि शक्तयोष्टौ ॥ २१ ॥

शब्दादि तन्मात्राः पञ्चपुष्पबाणाः ॥ २२ ॥

मन इक्षु धनुः ॥ २३ ॥ रागः पाशः ॥ २४ ॥ द्वेषोऽङ्कुशः ॥ २५ ॥

अव्यक्तमहदहंकाराः कामेश्वरी वज्रेश्वरी भगमालिन्योऽन्तः

त्रिकोणगा देवताः ॥ २६ ॥

निरुपाधिक सम्विदेव कामेश्वरः ॥ २७ ॥

सदानन्दपूर्णस्वात्मैव परदेवता ललिता ॥ २८ ॥

लौहित्यमेतस्य सर्वस्य विमर्शः ॥ २९ ॥ अनन्यचित्तत्वेन च सिद्धिः ॥ ३० ॥

भावनायाः क्रिया उपचाराः ॥ ३१ ॥

अहं-त्वं, अस्ति-नास्ति, कर्तव्यमकर्तव्यं, उपासितव्यमित्यादि

विकल्पानामात्मनि विलापनं होमः ॥ ३२ ॥

भावनाविषयाणाम् अभेदभावनं तर्पणं ॥ ३३ ॥

पञ्चदशतिथिरूपेण कालस्य परिणामावलोकनं ॥३४॥

एवं मुहूर्तत्रितयं। मुहूर्तद्वितयं। मुहूर्तमात्रं वा भावनापरो जीवन्मुक्तो भवति ।

स एव शिवयोगीति गद्यते ॥३५॥

कादिमतेनान्तश्चक्रभावनाः प्रतिपादिताः ॥३६॥

य एवं वेद सोऽथर्वशिरोऽधीते ॥३७॥

इति भावनोपनिषत् ॥

ॐ भद्रं कर्णेभिः शृणुयाम देवाः । भद्रं पश्येमाक्षभिर्यजत्राः ।

स्थिरैरङ्गैस्तुष्टुवागं सस्तनूभिः । व्यशेम देवहितं यदायुः ।

स्वस्ति न इन्द्रो वृद्धश्रवाः । स्वस्ति नः पूषा विश्ववेदाः ।

स्वस्ति नस्ताक्ष्र्यो अरिष्टनेमिः । स्वस्ति नो बृहस्पतिर्दधातु ॥

ओं शान्तिः शान्तिः शान्तिः ॥

## ॥ त्रिपुरोपनिषत् ॥

ओं वाङ्मे मनसि प्रतिष्ठिता । मनो मे वाचि प्रतिष्ठितम् ।
आविरावीर्म एधि । वेदस्य म आणीस्थः । श्रुतं मे मा प्रहासीः ।
अनेनाधीतेन । अहोरात्रान् संदधामि । ऋतं वदिष्यामि ।
सत्यं वदिष्यामि । तन्मामवतु । तद्वक्तारमवतु । अवतु माम् ।
अवतु वक्तारम् । अवतु वक्तारम् ।
ओं शान्तिः शान्तिः शान्तिः ॥

ॐ तिस्रः पुरस्–त्रिपथा विश्वचर्षणी यत्राकथा अक्षरा सन्निविष्टाः ।
अधिष्ठायैनामजरा पुराणी महत्तरा महिमा देवतानाम् ॥ १॥
नवयोनिर्नवचक्राणि दधिरे नवैव योगा नव योगिनीश्च ।
नवानां चक्रे अधिनाथाः स्योना नव मुद्रा नव भद्रा महीनाम् ॥ २॥
एका सा आसीत् प्रथमा सा नवासीदासोनविंशदासोनत्रिंशत् ।
चत्वारिंशदथ तिस्रः समिधा उशतीरिव मातरो मा विशन्तु ॥ ३॥
ऊर्ध्वज्वलज्वलनज्ज्योतिरग्रे तमो वै तिरश्चीनमजरं तद्रजोऽभूत् ।
आनन्दनं मोदनं ज्योतिरिन्दोः एता उ वै मण्डला मण्डयन्ति ॥ ४॥
तिस्रश्च रेखाः सदनानिभूमे–स्त्रिविष्टपा–स्त्रिगुणा–स्त्रिप्रकाशाः ।
एतत्पुरं पूरकं पूरकाणामत्र प्रथेते मदनो मदन्या ॥ ५॥
मदन्तिका मानिनी मङ्गला च सुभगा च सा सुन्दरी शुद्धिमत्ता ।

लज्जा मतिस्तुष्टिरिष्टा च पुष्टा लक्ष्मीरुमा ललिता लालपन्ती ॥ ६॥
इमां विज्ञाय सुधया मदन्ती परिसृता तर्पयन्तः स्वपीठम् ।
नाकस्य पृष्ठे महतो वसन्ति परं धाम त्रैपुरं चाविशन्ति ॥ ७॥
कामो योनिः कमला वज्रपाणिर्गुहा हसा मातरिश्वाभ्रमिन्द्रः ।
पुनर्गुहा सकला मायया च पूरूच्यैषा विश्वमातादिविद्या ॥ ८॥
षष्ठं सप्तममथ वह्निसारथिमस्या मूलत्रिक्रमादेशयन्तः ।
कथ्यं कविं कल्पकं काममीशं तुष्टुवांसो अमृतत्वं भजन्ते ॥ ९॥
त्रिविष्टपं त्रिमुखं विश्वमातुर्नवरेखाः स्वरमध्यं तदीळे ।
बृहत्तिथीर्दश पञ्चादि नित्या सा षोडशी पुरमध्यं बिभर्ति ॥ १०॥
द्वा मण्डला द्वा स्तना बिंबमेकं मुखं चाधस्त्रीणि गुहा सदनानि ।
कामी कलां काम्यरूपां विदित्वा नरो जायते कामरूपश्च काम्यः ॥ ११॥
परिस्रुतम् झषमाद्यं पलं च भक्तानि योनीः सुपरिष्कृतानि ।
निवेदयन्देवतायै महत्यै स्वात्मीकृत्य सुकृती सिद्धिमेति ॥ १२॥
सृण्येव सितया विश्वचर्षणिः पाशेन प्रतिबध्नात्यभीकान् ।
इषुभिः पञ्चभिर्धनुषा च विध्यत्यादिशक्तिररुणा विश्वजन्या ॥ १३॥

भगः शक्तिर्भगवान्काम ईशः उभा दातारविह सौभगानाम् ।

समप्रधानौ समसत्वौ समोतयोः समशक्तिरजरा विश्वयोनिः ॥ १४॥

परिस्रुता हविषा पावितेन प्रसङ्कोचे गलिते वैमनस्कः ।

सर्वः सर्वस्य जगतो विधाता भर्ता हर्ता विश्वरूपत्वमेति ॥ १५॥

इयं महोपनिषत्त्रिपुरायाः यामक्षरं परमे गीर्भिरीट्टे ।

एषर्ग्यजुः परमेतच्च सामेवायमथर्वेय मन्या च विद्योम् ॥ १६॥

ओं वाङ्मे मनसि प्रतिष्ठिता । मनो मे वाचि प्रतिष्ठितम् ।

आविरावीर्म एधि । वेदस्य म आणीस्थः । श्रुतं मे मा प्रहासीः ।

अनेनाधीतेन। अहोरात्रान् संदधामि । ऋतं वदिष्यामि ।

सत्यं वदिष्यामि । तन्मामवतु । तद्वक्तारमवतु । अवतु माम् ।

अवतु वक्तारम् । अवतु वक्तारम् । ओं शान्तिः शान्तिः शान्तिः ॥

## ॥ कौलोपनिषत् ॥

शन्नः कौलिकः शन्नो वारुणी शन्नः शुद्धिः शन्नोऽग्निः शन्नः सर्वगं समभवत् । ॐ नमो ब्रह्मणे नमः पृथिव्यै नमोऽद्भ्यो नमोऽग्नये नमो वायवे नमो गुरुभ्यः । त्वमेव प्रत्यक्षं सैवासि । त्वामेव प्रत्यक्षं तां वदिष्यामि । ऋतं वदिष्यामि । सत्यं वदिष्यामि । तन्मामवतु । तद्वक्तारमवतु । अवतु माम् । अवतु वक्तारम् ।ॐ शान्तिः शान्तिः शान्तिः ।

अथातो धर्मजिज्ञासा । ज्ञानं बुद्धिश्च । ज्ञानं मोक्षैककारणम् । मोक्षस्सर्वात्मतासिद्धिः । पञ्च विषयाः प्रपञ्चः । तेषां ज्ञानस्वरूपाः । योगो मोक्षः । अधर्मकारणाज्ञानमेव ज्ञानम् । प्रपञ्च एव ईश्वरः । अनित्यं नित्यम् । अज्ञानं ज्ञानम् । अधर्म एव धर्मः । एष मोक्षः । पञ्च बन्धाः ज्ञानस्वरूपाः । पिण्डाज्जननम् । तत्रैव मोक्षः । एतत् ज्ञानम् ।सर्वेन्द्रियाणां नयनं प्रधानम् । धर्मविरुद्धाः कार्याः । धर्मविहिता न कार्याः । सर्वं शाम्भवीरूपम् । आम्नाया न विद्यन्ते । गुरुरेकः। सर्वैक्यताबुद्धिमन्ते । आमन्त्रसिद्धेः । मदादिस्त्याज्यः ।

प्राकट्यं न कुर्यात् । न कुर्यात्पशुसम्भाषणम् । अन्यायो न्यायः ।

न गणयेत्कमपि । आत्मरहस्यं न वदेत् । शिष्याय वदेत् ।

अन्तः शाक्तो बहिः शैवः लोके च वैष्णवः । अयमेवाचारः ।

आत्मज्ञानान्मोक्षः । लोकान्न निन्द्यात् । इत्यध्यात्मम् ।

व्रतं न चरेत् । न तिष्ठेन्नियमेन । नियमान्न मोक्षः ।

कौलप्रतिष्ठां न कुर्यात् । सर्वसमो भवेत् । स मुक्तो भवति ।

पठेदेतानि सूत्राणि प्रातरुत्थाय देशिकः ।

आज्ञासिद्धिर्भवेत्तस्य इत्याज्ञा पारमेश्वरी ।

यश्चाचारविहीनोऽपि यो वा पूजां न कुर्वते ।

यदि ज्येष्ठं न मन्येत नन्दते नन्दने वने ।

शन्नः कौलिकः शन्नो वारुणी शन्नः शुद्धिः शन्नोऽग्निः शन्नः सर्वगं समभवतु ।

ॐ नमो ब्रह्मणे नमः पृथिव्यै नमोऽद्भ्यो नमोऽग्नये नमो वायवे नमो गुरुभ्यः । तामेव प्रत्यक्षं सैवासी । तामेव प्रत्यक्षं ता म वादिषं । ऋत म वादिषं । सत्यम वादिषं । तन्मामावीत् । तद्वक्तारमावीद् । आवीर्माम् । आवीद् वक्तारम् । ॐ शान्तिः शान्तिः शान्तिः ।